श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४७

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४७

*उलूखलबन्धनवर्णनम्*

एकदा दधिविमाथकारिणीं मातरं समुपसेदिवान् भवान्।
स्तन्यलोलुपतया निवारयन्नङ्कमेत्य पपिवान् पयोधरौ॥ १ ॥

अर्धपीतकुचकुड्मळे त्वयि स्निग्धहासमधुराननाम्बुजे।
दुग्धमीश दहने परिस्रुतं धर्तुमाशु जननी जगाम ते॥ २ ॥

सामिपीतरसभङ्गसङ्गतक्रोधभारपरिभूतचेतसा।
मन्थदण्डमुपगृह्य पाटितं हन्त देव दधिभाजनं त्वया॥ ३ ॥

उच्चलद्ध्वनितमुच्चकैस्तदा सन्निशम्य जननी समाद्रुता।
त्वद्यशोविसरवद् ददर्श सा सद्य एव दधि विस्तृतं क्षितौ॥ ४ ॥

वेदमार्गपरिमार्गितं रुषा त्वामवीक्ष्य परिमार्गयन्त्यसौ।
सन्ददर्श सुकृतिन्युलूखले दीयमाननवनीतमोतवे॥ ५ ॥

त्वां प्रगृह्य बत भीतिभावनाभासुराननसरोजमाशु सा।
रोषरूषितमुखी सखीपुरो बन्धनाय रशनामुपाददे॥ ६ ॥

बन्धुमिच्छति यमेव सज्जनस्तं भवन्तमयि बन्धुमिच्छती।
सा नियुज्य रशनागुणान् बहून् द्व्यङ्गुलोनमखिलं किलैक्षत॥ ७ ॥

विस्मितोत्स्मितसखीजनेक्षितां स्विन्नसन्नवपुषं निरीक्ष्य ताम्।
नित्यमुक्तवपुरप्यहो हरे बन्धमेव कृपयाऽन्वमन्यथाः॥ ८ ॥

स्थीयतां चिरमुलूखले खलेत्यागता भवनमेव सा यदा।
प्रागुलूखलबिलान्तरे तदा सर्पिरर्पितमदन्नवास्थिथाः॥ ९ ॥

यद्यपाशसुगमो विभो भवान् संयतः किमु सपाशयाऽनया।
एवमादि दिविजैरभिष्टुतो वातनाथ परिपाहि मां गदात्॥ १० ॥

**********